Roll No : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# AP–488

## M.A. (Final) Examination, 2021

## SANSKRIT

Paper - VI **(क)**

**(शास्त्रीय साहित्य एवं काव्य)**

*Time : 1½ Hours* ] [ *Maximum Marks : **100***

**(खण्ड–अ)** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**(खण्ड–ब)** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**(खण्ड–स)** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ** प्रत्येक 2

1. समस्त दशप्रश्नानामुत्तरं ददातु। कयोश्चित् द्वयो: उत्तरं संस्कृत भाषायां लिखतु।

   (i) वक्रोक्ति सम्प्रदायस्य क: प्रवर्तक ? तस्य ग्रन्थस्य नाम: लिखतु।

   (ii) कुन्तकसम्मतं काव्यस्य सामान्य लक्षणं लिखतु।

(iii) काव्यमीमांसाया: प्रथमोऽध्यायस्य किं नामास्ति ?

(iv) ''या दुग्धाऽपि न दुग्धेव कविदोग्धृभिरन्वहम्'' सा का ?

(v) अर्थशास्त्रस्य रचयिता क: अस्ति ?

(vi) अर्थशास्त्रमनुसृत्य चतुर्विधविद्याया: नामानि लिखतु।

(vii) किं मान्द्यं प्रभाकरवर्द्धनस्य ?

(viii) हर्षवर्द्धनस्य पित्रो: भ्रातु: भगिन्या च नामानि लिखतु।

(ix) महाश्वेता कस्य अर्चनां करोति ?

(x) महाश्वेतावृत्तान्तस्य लेखकस्य नाम लिखतु।

**खण्ड–ब** प्रत्येक 8

केषाञ्चित् पञ्चप्रश्नानामुत्तरं ददातु। प्रश्न संख्या 4, 5 अनिवार्या:।

2. प्रस्तुत कारिकाया: सप्रसंग व्याख्या कुर्यात्–

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।

काव्यामृतरसेनान्तश्चमत्कारो वितन्यते॥

3. सप्रसंग व्याख्या करणीया–

शरीरं चेदलङ्कार: किमलङ्कुरुतेऽपरम्।

आत्मैव नात्मान: स्कन्धं क्वचिदप्यधिरोहति॥

4. संस्कृत माध्यमेन सप्रसंग व्याख्या कुर्यात्–

'सकलविद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानम्' इति यायावरीय:। गद्यपद्यमयत्वात् कविधर्मत्वात् हितोपदेशकत्वाच्च। तत् धि शास्त्राण्यनुधावति। 'वार्त्ता कामसूत्रं शिल्पशास्त्रं दण्डनीतिरिति पूर्वै: सहाऽष्टादशविद्यास्थानानि' इत्यपरे। आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्या: 'दण्डनीतिरेवैका विद्या' इत्यौशनसा:। दण्डभयाद्धिकृत्स्नो लोक: स्वेषु स्वेषु कर्मस्ववतिष्ठते। 'वार्त्ता दण्डनीतिर्द्वेविद्ये' इति बार्हस्पत्या:।

5. संस्कृते सप्रसंग व्याख्या विधेया–

''सर्वेषामहिंसा सत्यं शौचमनसूया नृशंस्यं क्षमा च''॥

6. सप्रसंग व्याख्या करोतु–

तान् राजा स्वविषये मन्त्रिपुरोहित सेनापति युवराज-दौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसंनिधातृ प्रदेष्ट्रनायक-पौरव्यावहारिककार्तान्तिक मन्त्रिपरिषदध्यक्षदण्डदुर्गान्त-पालाटविकेषु श्रद्धेय देशवेषशिल्प भाषाभिजनापदेशान्भक्तिः सामर्थ्य योगाच्चापसर्पयेत्॥

7. सप्रसंग व्याख्यां करोतु–

अन्य स्मिन्नहनि मध्यन्दिने विगतजयशब्दम्, अस्तमिततूर्यनादमुपसंहृतगीतम्, उत्सारितोत्सवम्, अप्रगीतचारणम्, अप्रसारितापणपण्यम् स्थान-स्थानेषु पवनबलकुटिलाभिः कोटिहोमधूमलेखाभिरुल्लसन्तीभिर्यममहिषविषाण कोटिभिरिवोल्लिख्यमानम्, कृतान्तपाशवागुराभिरिव वेष्ट्यमानम् उपरिकालमहिषालंकारकालायश किङ्किणीभिरिव कटु क्वणन्तीभिर्दिवसं वायसमण्डलीभिर्भ्रमन्तीभिरावेद्यमानप्रत्यासन्नाशुभम्, क्वचित्प्रतिशायितस्निग्ध-बान्धवाराध्यमानाहिर्बुध्नम्, क्वचिद्दीपिकादह्यमानकुलपुत्रक प्रसाद्यमान- मातृमण्डलम्, क्वचिन्मुण्डोपहार-हरणोद्यतद्रविड प्रार्थ्यमाना मर्दकम् शून्यमिव सुप्तमिव मुषितमिव विलक्षितमिव छलितमिव मूर्च्छितमिव स्कन्धावारं समाससाद।

8. सप्रसंग व्याख्या विधेया–

आसीच्च मम मनसि-'शान्तात्मनि दूरीकृतसुरतव्यतिकरेऽस्मिन् जाने मां निक्षिपता किमिदमनार्य्येणा-सदृशमारब्धं मनसिजेन। एवञ्च नामातिमूढ़ं हृदयमङ्गनाजनस्य, यदनुरागविषयोग्यतामपि विचारयितुं नालम्। क्वेदमतिभास्वरं धाम तेजसां तपसाञ्च, क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिष्पन्दितानि। नियतमयं मामेवं मकरलाञ्छनेन विडम्ब्यमानामुपहसति। मनसा चित्रच्चेदं यदहमेव गच्धन्टयपि न शक्नोम्यात्मनो विकारमुप-संहर्त्तुम्। अन्या अपि कन्यकास्त्रपां विहाय स्वयमुपयाताः पतीन्, अन्या अप्यनेन दुर्विनीतेन मन्मथेनोन्मत्ततां नीता नार्य्यः, न पुनरहमे का यथा।

**खण्ड–स** प्रत्येक 20

द्वयोः प्रश्नयोः उत्तरं ददातु—(शब्द सीमा **500**)

9. 'काव्यपुरुषोत्पत्तिः' इति समीचीन समालोचयताम्।

10. कौटिलीय-अर्थशास्त्रमनुसृत्य 'इन्द्रिय जयस्वरूपम्' इति विवेचनं कुरु।

11. हर्षचरितस्य पञ्चमोच्छ्वासे वर्णितं राजा प्रभाकरवर्धनस्य दशायावर्णनं कुरु।

12. महाश्वेतावृत्तान्तस्य भाषा-सौष्ठवे लेखं लिख्यताम्।